## अध्याय :- ५२ Chapter-52



अर्जुन [१]उवाच ।।

[२] कोटितीर्थं कथं जातं केन वा निर्मितं मुने ।।

कस्माद्वा कोटितीर्थानां फलमत्रोच्यते मुने ।। १

नारद उवाच ।।[३]

यदा मे स्थापितं स्थानं प्रसाद्याथ मया प्रभुः ।।

ब्रह्मलोकात्समानीतः साक्षाद्ब्रह्मा पितामहः ।। २

ततो मध्याह्नसमये स्नानार्थं भगवान्विधिः ।।

सस्मार कोटितीर्थानां स्मृतान्यत्रागतानि च ।। ३

स्वर्गात्त्रिदशलक्षाणि सप्ततिश्च महीतलात् ।।

पातालद्विंशलक्षाणि स्मृतान्यभ्यागतानि च ।। ४

अनेन प्रविभागेन लिंगान्यपि कुरूद्वह ।।

आयातानि[४] यथा पूजां विदधाति पितामहः ।। ५

ततोऽभिषेचनं कृत्वा लिंगान्यभ्यर्च्य पद्मभूः ।।

मध्याह्नकृत्यं संसाध्य मम प्रेम्णा वरं ददौ ।। ६

ततो भगवता ह्यत्र मनसा निर्मितं[५] सरः ।।

भगवानर्चितस्तीर्थैरिदमूचे प्रजापतिः ।। ७

---

१ अ. प्रतौ 'उवाच' नास्ति ।

२ कोटितीर्थं........मुने ।

कस्माद्वा...........मुने ।।१।। ब. प्रतौ इत्ययं श्लोकः नास्ति ।

३ अ. श्री नारद ।। ब. 'नारद उवाच' इत्ययं पाठः नास्ति ।

४ अ. अयातानि

५ अ. ब. निर्मितः

किं कुर्म भगवन्धातरादेशं देहिनः प्रभो ।।
तेषां तद्वचनं श्रुत्वा ब्रह्मा प्रहि प्रजापतिः ।। ८

एतस्मिन्सरसि स्थेयं तीर्थैः सर्वैरथात्र च ।।
एकस्मिंश्च तथा लिंगे सर्व लिंगैर्ममार्चनात् ।। ९

कोटिनामेव तीर्थानां लिंगानां स्नानपूजया ।।
दानेन च फलं त्वत्र यदि सत्यं वचो मम ।। १०

यः श्राद्धं कुरुते चात्र पिंडदानं यथाविधि[1] ।।
पितॄणामक्षया तृप्तिर्जायते नात्र संशयः ।। ११

स्नात्वा यो ऽभ्यर्च्य देवं कोटीश्वर ◌ मनन्यधीः ।।
कोटि ◌ लिंगार्चनफलं व्यक्तं तस्यो पजायते ।। १२

त्रलोक्ये यानि तीर्थानि गंगाद्याः सरितस्तथा ।।
तेषां स फलमाप्नोति कोटितीर्थविगाहनात ।। १३

एवं दत्त्वा वरं ब्रह्मा ब्रह्मलोकं ययौ प्रभुः[2] ।।
कोटितीर्थं च संजातं ततः प्रभृति विश्रुतम् ।। १४

---

१ ब. विधिः

२ अ. प्रतौ नास्ति ।

अस्य तीरे[१] पुरा पार्थ ब्रह्माद्यैर्देव सत्तमैः ।।
यज्ञान्बहु विधान्कृत्वा ततः सिद्धिं परां ययुः ।। १५

वसिष्ठाद्यैर्मुनि वरैस्तपश्श्रीकीर्णा पुरानद्य ।।
मनसो/भीप्सितान्कामान्प्रापुरन्ये तपोधनाः ।। १६

अत्र तीर्थे पुरा पार्थ अत्रिणा विहितं तपः ।।
कोटितीर्थाद्दक्षिणातः स्थापितं लिंगमुत्तमम् ।। १७

अत्रीश्वराभिसंज्ञं तु महापापहरं परम् ।।
स्थापयित्वा च तल्लिंगमग्रे[२] चक्रे सरोवरम् ।। १८

तत्र स्नात्वा च यो मर्त्यः श्राद्धं कुर्यात्प्रयत्नतः ।।
अत्रीश्वरं समभ्यर्च्य रुद्रलोके[३] वसेच्चिरम् ।। १९

भरद्वाजेन मुनिना कोटितीर्थे सरोवरे ।।
तपश्श्रीकीर्णं महाबाहो यज्ञाश्च विहिताः किल ।। २०

भरद्वाजेश्वरं लिंगं स्थापितं सुमनोहरम् ।।
तत्र कृत्वा सरो रम्यं परां मुदमवाप्तवान् ।। २१

---

१ अ. तीर्थे
२ अ. प्रतौ नास्ति ।
३ ब. प्रतौ 'त्रैलोक्ये' इति स्यात् ।

तत्र स्नात्वा नरोभक्त्या श्राद्धं कुर्याद्विधानतः ॥
भरद्वाजेश्वरं पूज्य शिवलोके महीयते ॥ २२

ततश्च कोटितीर्थेऽस्मिन्गौतमो भगवानृषिः ॥
अतप्यत तपो घोरमहल्या संगमाशया ॥ २३

तं कामं प्राप्तवान्धीमान्परां मुदमुपागतः ॥
अहल्यया[1] समायोगमेततीर्थ प्रभावतः ॥ २४

अस्मिन्क्षेत्रे महालिंगं गौतमेश्वर संज्ञितम्[2] ॥
स्थापयामास भगवानहल्या सरसस्तटे ॥ २५

अर्जुन उवाच[3] ॥
अहल्यया कदा ब्रह्मन्खानितं वै महत्सरः[4] ॥
तन्मम ब्रूहि सकलमहल्यासरः कारणम् ॥ २६

नारद उवाच ॥[5]
अहल्या[6] शापमापन्ना गौतमात्किल फाल्गुन ॥
पुरा चंद्र समायोगे परं दुःखमुपागता ॥ २७

ततो दुःखार्तः स मुनिः कोटितीर्थे करोतपः ॥
तपसा तेन वै पार्थाहल्यया सह संगतः ॥ २८

---

१ अ. अहिल्यया
२ ब. संज्ञकं
३ अ. प्रती नास्ति
४ ब. महासरः
५ अ. श्री नारद ॥ ब. श्री नारद उ० ॥
६ अ. ब. 'अहिल्या'

ततः साध्वी परं त्द्रष्टा अत्र क्षेत्रे सरोवरम् ।।
चकार सुमहत्पुण्यं तीर्थादिः परिपूरितम् ।। २९

अहल्यासरसि[1] स्नानं पिंडदानं समाचरेत् ।।
गौतमेशं च संपूज्य ब्रह्मलोकं स गच्छति ।। ३०

कोटितीर्थे नरश्रेष्ठ[2] अनेके मुनयोऽमलाः ।।
तपस्तप्त्वा सुघारं च परां सिद्धिमुपागताः ।। ३१

राजभिर्बहुभिः पूर्वं तपो दानं तथा ध्वराः ।।
अस्मिंस्तीर्थे सुविहिताः परां सिद्धिमुपा गताः ।। ३२

अस्य तीरे द्विजं चैकं मृष्टान्नैर्यश्च तर्पयेत् ।।
तेन श्रद्धा सहायेन कोटिर्भवति तर्पिता ।। ३३

अस्य तीरे नरः पार्थ रत्नानि विविधानि च ।।
गोभूमितिलधान्यानि वासांसि विविधानि च ।। ३४

कोटितीर्थे प्रतिश्रुत्य द्विजेभ्यो न प्रयच्छति ।। ३५

---

१ अ. ब. 'अहिल्या'
२ अ. श्रेष्ट
३ ब. नर

नरके पातयित्वा च [1]कुलमेकोत्तरं शतम् ।।
आत्मानं पातयेत्पश्चाद्दारुणं रौरवं महत् ।। ३६

माघमासे तु संप्राप्ते प्रातःकाले तथाऽमले ।।
यः स्नाति मकरादित्ये तस्य पुण्यं शृणुष्व मे ।। ३७

सर्वतीर्थेषु यत्पुण्यं सर्वयज्ञेषु यत्फलम् ।।
सर्वदानव्रतैर्यच्च कोटितीर्थे दिने दिने ।। ३८

तत्पुण्यं लभते मर्त्यो नात्र कार्या विचारणा ।।
कन्यागते सवितरि यः श्राद्धं कुरुते नरः ।। ३९

पितरस्तस्य तुष्यंति [2]गयाश्राद्धशतैर्न तु ।।
कार्तिके मासि संप्राप्ते स्नानादि कुरुते यदि ।। ४०

तदक्षयफलं सर्वं ब्रह्मणो वचनं यथा ।।
इष्ट्वैवात्र यज्ञमेकं तु कोटियज्ञफलं लभेत् ।। ४१

कन्यां ब्राह्मेण विधिना दत्त्वा कोटिगुणं फलम् ।।
सर्वदानं कोटिगुणं कोटितीर्थे भवेद्यतः ।। ४२

---

१ 'कुलमेकोत्तरं सतम्' ।। इदमर्धं अ. प्रतौ लुप्तम् ।

२ गया..... तु । इदमर्धं अ. प्रतौ लुप्तम् ।

कोटितीर्थे[१] त्यजेत्प्राणान्हृदि कृत्वा तु माधवम् ।।
तस्य पार्थ चिरं स्वर्गे ह्यक्षया शाश्वतीगतिः ।। ४३

कोटितीर्थे तीर्थवरे[२] देहत्यागं करोति यः ।।
तस्य पूजां प्रकुर्वंति बहुमाद्या देवता गणाः ।। ४४

अस्य तीरे देहदाहो[३] यस्य कस्य प्रजायते ।।
अस्थिक्षेपो यस्य भवेन्महीसागर संगमे ।। ४५

तत्फलं गदितुं पार्थ वागीशोऽपि नवैक्षमः ।।
एतज्ज्ञात्वा परं पार्थ कोटितीर्थं प्रसेवते ।। ४६

दिने दिने फलं तस्य कापिलं गो सहस्त्रकम् ।।
स्वर्गे मर्त्ये च पाताले तस्मादेतत्सुदुर्लभम् ।। ४७

*४ इति श्री स्कांदे..... कोटि तीर्थ माहात्म्य वर्णनं नाम -
द्विपंचासत्तमोऽध्यायः ।।

---

१ ब. कोटितीर्थ

२ अ. प्रतौ नद्दस्ति ।

३ ब. देहदानं

*४ अ. इति श्री स्कंदपुराणे कुमारिकाखंडे कोटितीर्थ माहात्म्यं ।।
ब. इति श्री स्कंदपुराणे कुमारिकाखंडे कोटितीर्थ महात्म्यं
द्विपंचाशोऽध्यायः ।।